# A-I/1/2298/22

## द्वितीयसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमेयकमलमार्तण्डस्य रचनाकालः कः?
2. प्रमेयकमलमार्तण्डस्य प्रमुखं प्रतिपाद्यं किमस्ति?
3. 'ब्रह्माद्वैतवादः' इत्यनेन किमभिधीयते?
4. 'सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किञ्चन' इत्यनेन किं तात्पर्यम्?
5. बौद्धदर्शनस्य कति प्रमुखाः सम्प्रदायाः सन्ति? नामानि लिखत।
6. विज्ञानाद्वैतवादः कस्य सम्प्रदायस्य मतम्?
7. विज्ञानाद्वैतवादः किमुच्यते?
8. 'सहोपलंभनियमादभेदो नीलतद्धियोः' इति वचनेन किमुक्तम्?
9. चित्राद्वैतवादेन किं तात्पर्यम्?
10. चित्राद्वैतवादस्य केन मतेन सह सम्बन्धो वर्तते?
11. शून्याद्वैतवादः कः?

**अथवा**

'शून्याद्वैतवादः' कस्य सम्प्रदायस्य मतमस्ति?

12. 'स्वव्यवसायः' किमुच्यते?

**अथवा**

अर्थव्यवसायः कीदृशो भवति?

13. 'अचेतनज्ञानवादः' इति कस्य मतम्?

**अथवा**

सांख्यदर्शने प्रमुखं तत्त्वद्वयं किं स्वीकृतम्?

14. 'ज्ञानं प्रकृतेः धर्मः' इति केषां मतम्?

**अथवा**

'साकारज्ञानवादः' इति कस्य मतम्?

15. साकारज्ञानवादेन किं तात्पर्यम्?

**अथवा**

भूतचतुष्टयं किम्? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पूर्वपक्षपुरस्सरं ब्रह्माद्वैतवादस्य निराकरणं कुरुत।

17. पूर्वपक्षसहितं शून्याद्वैतवादं निराकुरुत।

18. अचेतनज्ञानवादस्य पूर्वपक्षपूर्वकं समीक्षणं कुरुत।

**अथवा**

साकारज्ञानवादः कथं न युक्तिसंगतः? इति स्पष्टयत।

19. भूतचैतन्यवादस्य विवेचनं कुरुत।

**अथवा**

स्वसंवेदनज्ञानवादस्य विवेचनं करणीयम्।

20. ज्ञानान्तरस्वेद्यज्ञानवादः कः? स्पष्टयत।

**अथवा**

चित्राद्वैतवादस्य समीक्षणं कुरुत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. सुखादौ प्रत्यक्षत्वसिद्धिः कार्या।

**अथवा**

'प्रदीपवत्' इति सूत्रमधिकृत्य ज्ञानस्य स्वपरप्रकाशकत्वं विवेचनीयम्।

# A-I/2/2299/22

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. भट्टाकलंकदेवस्य सूरेः समयः विज्ञाप्यताम्?
2. जीवस्य औपशमिकादयो भावाः असाधारणाः कथं प्रोच्यन्ते?
3. अनपवर्त्यायुषः जीवाः के प्रोक्ताः?
4. औपशमिकभावस्य स्वरूपं प्रतिपादयत?
5. असिद्धत्वं कस्मिन् भावे परिगणितुं शक्यते?
6. मतिज्ञानं क्षयोपशमभावतया कथं प्रज्ञप्तम्?
7. भावेन्द्रियं किमुच्यते? स्पष्टयत।

**अथवा**

शरीराणि कति सन्ति? नामानि लिखत।

8. 'श्रुतमनिन्द्रियस्य' इत्यस्य तात्पर्यं प्रकटयत।

**अथवा**

वैक्रियिकशरीरं किं? केषां च भवति?

9. पारिणामिकभावाः कति प्रज्ञप्ताः? तत्त्वार्थवार्तिकदिशा समादधत।
10. "द्विनवाष्टादशैकविंशतितिभेदा यथाक्रमम्" इति सूत्रं स्पष्टयत।
11. उभयात्मको मिश्रः क्षीणक्षीणमदशक्तिको द्रववत् इत्यस्य कोऽर्थः?
12. क्षायिकभावाः नवविधाः प्रोक्ताः, के ते? लिख्यन्ताम्।

**अथवा**

अज्ञानं त्रिविधं भवति नाम्ना निर्दिशत। कुत्र च भावे इमानि परिगण्यन्ते?

13. "कषायोदयरञ्जिता योगप्रवृत्तिर्लेश्या" इति वचनं स्पष्टयत।

**अथवा**

उपयोगः कः प्रोक्तः पाठ्यग्रन्थदिशा परिभाष्यताम्।

14. 'साकारानाकारभेदाद् द्विविधः' इति वार्तिकं विशदयत।

**अथवा**

"आत्मोपचितकर्मवशादात्मनो भवान्तरावाप्तिः संसारः" इति वार्तिकं स्पष्टयत।

15. "विग्रहगतौ कर्मयोगः" इति सूत्रस्य तात्पर्यं किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. जीवस्य लक्षणं पाठ्यग्रन्थदिशा प्रतिपादयत?

17. संसारिणां जन्म कतिविधं भवति? यथाशास्त्रं प्ररूप्यताम्।

18. जीवस्य असाधारणभावेषु औदयिकभावाः के प्रज्ञप्ताः? कथञ्च तेषाम् औदयिकत्वं स्वीक्रियते?

**अथवा**

आहारकशरीरं किमुच्यते? केषाञ्च? किमर्थं भवति? स्पष्टयत।

19. "परं परं सूक्ष्मं" इति सूत्रस्य भावः समभिव्यञ्जनीयः।

**अथवा**

"अनादिसम्बन्धे च" इति सूत्रं सुस्पष्टं विवेचयत।

20. "अप्राप्तकालस्य मरणानुपलब्धेः अपवर्ताभावः इति शिष्यजिज्ञासायाः समाधानं कुरुत।

**अथवा**

"नारकसम्मूर्च्छिनो नपुंसकानि" इत्यनेन किं प्रतिपाद्यते? विशदयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. तत्त्वार्थवार्तिकदिशा जीवविवेचनं कुरुत।

**अथवा**

संसारिणां जीवानाम् इन्द्रियाणि मनश्च प्रतिपादयत।

# A-I/3/2300/ 22

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ध्यानं किमुच्यते?
2. ध्यानस्य परमफलं किमुक्तम्?
3. 'अणुपेहा' किमुच्यते?
4. 'भावणा' इत्यनेन किं तात्पर्यम्?
5. छद्मस्थानां ध्यानकालः कः प्रोक्तः?
6. ध्यानस्य कति प्रकाराः सन्ति?
7. 'भवकारणमहरुद्दाइं' इति वचनेन किं तात्पर्यम्?
8. विषयः किमुच्यते?
9. आर्तध्यानस्य कति भेदाः भवन्ति?
10. आर्तध्यानस्य फलं किं प्रोक्तम्?
11. आर्तध्यानं केषां न भवति?

**अथवा**

संसारहेतवः के भवन्ति? नामानि लिखत।

12. लेश्याः कति सन्ति?

**अथवा**

आर्तध्यानस्य कानि लक्षणानि उक्तानि?

13. हिंसानुबन्धीरौद्रध्यानस्य लक्षणं किम्?

**अथवा**

धर्मध्यानस्य कति प्रकाराः भवन्ति?

14. शुक्लध्यानं किमुच्यते ?

**अथवा**

धर्मध्यानस्य किं फलमुक्तम् ?

15. धर्मध्यानस्य द्वादशद्वाराणि कानि ? नामानि लिखत।

**अथवा**

शुक्लध्यानस्य चत्वारि आलंबनानि कानि ? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शुक्लध्यानस्य चत्वारि लिंगानि(चिह्नानि) विवेचनीयानि।

17. शुक्लध्यानस्य चतस्रः अनुप्रेक्षाः वर्णनीयाः।

18. एयं चउन्विहं राग दोस मोहं कियस्स जीवस्स। अट्टज्झाणं संसारवद्धणं तिरिय गइमूलं॥
इति गाथासूत्रं विवेचयत।

**अथवा**

धर्मध्यानस्य महत्त्वं प्रतिपादयत।

19. सत्तवह-वेह बंधणऽहणंकण मारणाइपनिहाणं। अइकोहंग्गहघत्थं निग्घिणमणसोऽहमविवागं॥
इति सूत्रस्य व्याख्यानं कुरुत।

**अथवा**

रौद्रध्यानस्य दुष्परिणामाः लेखनीयाः।

20. सद्दाइविसयसाहणधण सारक्खणपरायण मणिट्ठं। सव्वाभिसंकणपरोवघाटाकलुसाऽलं चित्तं॥
इत्यनेन परिग्रहानुबंधीरौद्रध्यानस्य विवेचनं कुरुत।

**अथवा**

शुक्लध्यानस्य श्रेष्ठत्वं प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. जीवने ध्यानस्य महत्त्वं प्रतिपादयत।

**अथवा**

आर्तरौद्रध्यानस्य दोषाः विवेचनीयाः।

# A-I/4/2301/22

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रवचनसारग्रन्थस्य कर्तुः नाम लिखत।
2. प्रवचनसारग्रन्थस्य भाषा का?
3. ज्ञानतत्त्वप्रज्ञापनाधिकारे कति गाथाः सन्ति?
4. पाठ्यग्रन्थस्य प्राकृतभाषायां किं नाम?
5. उपयोगत्रयाणां नामानि लिखत।
6. प्रवचनसारस्योपरि अमृतचन्द्राचार्येण विरचितसंस्कृतटीकायाः नाम लिखत।
7. 'चारित्तं खलु धम्मो' इति वचनस्य कः भावः?
8. 'विगदरागो' इति शब्दस्य कोऽर्थः?
9. घातिकर्मणः चत्वारः भेदाः के सन्ति?
10. श्रुतकेवली कोऽस्ति?

**अथवा**

किन्नाम प्रत्यक्षं ज्ञानम्?

11. केवलज्ञानस्य किं प्रमुखं वैशिष्ट्यम्?

**अथवा**

पाठ्यग्रन्थस्य मङ्गलाचरणे 'माणुसेखेत्ते' इत्यस्य कोऽर्थः?

12. शुद्धसंप्रयोगस्य किं लक्षणम्?

**अथवा**

शुद्धोपयोगस्य किं फलं भवति?

13. 'पुण्णफला अरहंता' इति स्पष्टयत।

**अथवा**

अर्हतां स्थाननिषद्याविहाराः धर्मोपदेशश्च कीदृशः भवति?

14. परोक्षज्ञानस्य किं स्वरूपम् ?

**अथवा**

दर्शनज्ञानप्रधानचारित्रस्य किं फलं भवति ?

15. 'मोहक्खोहविहीणो परिणामो अप्पणो हु समो' इत्यस्य कोऽभिप्रायः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य मङ्गलाचरणं विलिख्य तस्य व्याख्यां कुरुत।

17. अतीन्द्रियज्ञानस्य स्वरूपं महत्त्वञ्च विवेचयत।

18. शुभोपयोगस्य हेयोपादेयत्वं विवेचयत।

**अथवा**

सोक्खं वा पुण दुक्खं केवलणाणिस्स णात्थिदेहगदं।

जम्हा अदिंदियत्तं जादं तम्महा दुतं णेयं॥ –इति गाथायाः अर्थं वर्णयत।

19. आदा णाणपमाणं णाणं णेयप्पमाणमुद्दिट्ठं।

णेयं लोयालोयं तम्हा णाणं तु सव्वगयं॥ –इति गाथायाः भावं विवेचयत।

**अथवा**

जदि सो सुहो व असुहो ण हवदि आदा सयं सहावेणं

संसारो वि ण विज्जदि सव्वेसिं जीवकायाणं॥ –इति गाथां विशदयत।

20. जो जाणदि सो णाणं ण हवदि णाणेण जाणगो आदा।

णाणं परिणमदि सयं अट्ठा णाणट्ठिया सव्वे॥ –इति गाथायाः विवेचनं कुरुत।

**अथवा**

उप्पादो य विणासो विज्जहदि सव्वस्स अट्ठजादस्स।

पज्जाएण दु केणवि अट्ठो खलु होदि सब्भूदो॥ –इति गाथा व्याख्येया।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. ज्ञानाधिकारस्य सारांशः लेखनीयः।

**अथवा**

आचार्यकुन्दकुन्दस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।